अस्मिन् प्रश्नपत्रे **51** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति ।

**अनक्रुमांङ्कः** | | | | | | | | | | | | |

# सस्कृतसाहित्यम्
# (348)

**गढ़ूसख्ं‍या 71/SS/348/A/RE**

**स्तवकः A**

परीक्षादिवसः दिनांङ्कश्च ...........................................

निरीक्षकयोः हस्ताक्षरम् 1. ...........................................

2. ...........................................

**सामान्या निर्देशा :**

1. **सवर्षों** प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु ।
2. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
3. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
4. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
5. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
6. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
7. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या **71/SS/348/A/RE,** स्तवकः **A** नूनं लेख्या ।
8. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

**सामान्य अनदुशे :**

(1) **सवर्षों** प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु ।

(2) प्रश्नपत्रिकां पठितुं **15** निमेशाः दत्ताः । प्रश्नपत्रिका **02.15** मध्याह्ने समये दीयते । **02.15** समयतः **02.30** समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न कमपि उत्तरं लिखेयुः ।



UNNATI EDUCATIONS
9899436384: 9654-279-279

# सस्ंकृतसाहित्यम ्

# (348)

**परीक्षासमयावधि : होरात्रयम ]** **[पर्णाङ्काः : 100**

**निर्देशा :**

(i) अस्मिन् प्रश्नपत्रे **[A]** भागे **20**, **[B]** भागे **15**, **[C]** भागे **6**, **[D]** भागे **6**, **[E]** भागे **4** इति आहत्य **51** प्रश्नाः सन्ति ।

(ii) **सम** प्रश्नाः **अनिवार्याः** । तत्र वैकल्पिकभागेषु एकः एव समाधेयः ।

(iii) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति अङ्काः दीयन्ते ।

(iv) **[A]** भागे प्र.सं. **1** त: **20** पर्यन्तं बहुविकल्पप्रकारस्य प्रश्ना: **(MCQs)** येषु प्रत्येकम् एक: अंङ्क: भवति । एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु ।

(v) **[B]** भागे प्र.सं. **21** त: **35** पर्यन्तं वस्तुनिष्ठप्रश्ना: । प्रत्येकं प्रश्नः अङ्कद्वयात्मकः अस्ति । ते यथानिर्देशं समाधेया: ।

(vi) **[C]** भागे प्र.सं. **36** त: **41** पर्यन्तम् अतिलघूत्तरीया: प्रश्ना: प्रत्येकम् अंकद्वयात्मका: सन्ति । ते यथानिर्देशं **30** तः **50** शब्दानां परिधिमध्ये समाधेया: ।

(vii) **[D]** भागे प्र.सं. **42** त: **47** पर्यन्तम् अनतिदीर्घोत्तरीया: प्रश्ना: प्रत्येकम् अंकत्रयात्मका: सन्ति । ते यथानिर्देशं **50** तः **80** शब्दानां परिधिमध्ये समाधेया: ।

(viii) **[E]** भागे प्र.सं. **48** त: **51** पर्यन्तं दीर्घोत्तरीया: प्रश्ना: प्रत्येकं पञ्चाङ्कात्मका: सन्ति । ते यथानिर्देशं **80** त: **100** शब्दानां परिधिमध्ये समाधेया: ।

(ix) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

(x) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

(xi) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

(xii) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

(xiii) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां संख्या च प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रम: सम्यग् न वा ।

(xiv) अनुक्रमाङ्क: प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः ।

एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति । एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः ।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR



**UNNATI EDUCATIONS**
**9899436384: 9654-279-279**

**[A]** विंशतिप्रश्नानां युक्तं विकल्पं चिनुत - **1 × 20 = 20**

1. 'मेघदूतम्' कः अरचयत् ?
   (क) कालिदासः (ख) व्यासः
   (ग) भवभूतिः (घ) श्रीहर्षः

2. 'शारिपुत्रप्रकरणम्' कस्य रचना अस्ति ?
   (क) कालिदासस्य (ख) वाल्मीकेः
   (ग) भासस्य (घ) अश्वघोषस्य

3. शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति ?
   (क) द्वाविंशतिः (ख) विंशतिः
   (ग) एकविंशतिः (घ) पञ्चविंशतिः

4. 'यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम्' इत्यत्र **'यः'** इति सर्वनामपदं कस्मै प्रयुक्तम् ?
   (क) उदयनाय (ख) भासाय
   (ग) श्रीहर्षाय (घ) कालिदासाय

5. नलिनीदलगतसलिलं कीदृशम् ?
   (क) तरलम् (ख) कठोरम्
   (ग) विरलम् (घ) शुभ्रम्

6. 'सर्वं खल्विदं ब्रह्म' इति कस्य दर्शनस्य मूलं तत्त्वम् ?
   (क) द्वैतदर्शनस्य (ख) सांख्यदर्शनस्य
   (ग) अद्वैतदर्शनस्य (घ) न्यायदर्शनस्य

7. कः स्वपापेन विहिंसितः ?
   (क) पशुः (ख) खलः
   (ग) साधुः (घ) अरुणः

8. रोलम्बकदम्बस्य अवलम्बः कः ?
   (क) अग्निः (ख) इन्द्रः
   (ग) देवः (घ) सूर्यः

9. ब्रह्मचारिगुरुः बालिकां सान्त्वयितुं कम् आदिष्टवान् ?
   (क) यवनसैनिकम् (ख) श्यामवटुम्
   (ग) योगिराजम् (घ) गौरवटुम्

UNNATI EDUCATIONS



UNNATI EDUCATIONS
9899436384: 9654-279-279

10. सिंह-व्याघ्र-भल्लुक-गण्डक-फेरु-शशसहस्रव्याप्तानि अरण्यानि कः जनपदीकरोति ?

(क) कालः (ख) आकाशः

(ग) पवनः (घ) पावकः

11. तारापीडस्य प्रधानमन्त्री कः आसीत् ?

(क) चन्द्रापीडः (ख) शुकनासः

(ग) जनकः (घ) वैशम्पायनः

12. लक्ष्मीः उच्चैः श्रवसः कां गृहीत्वैव उद्गता ?

(क) मोहनशक्तिम् (ख) वक्रताम्

(ग) चञ्चलताम् (घ) मदिराम्

13. राज्ञाम् उष्णीषपट्टबन्धेनेव किम् /कः/का अवच्छाद्यते ?

(क) सत्यवादिता (ख) जरागमनस्मरणम्

(ग) गुणाः (घ) दाक्षिण्यम्

14. के दर्शनप्रदानमपि अनुग्रहं गणयन्ति ?

(क) बालाः (ख) युवानः

(ग) धीवराः (घ) राजानः

15. शब्दश्रवणजन्यार्थबोधं प्रति किं कारणम् ?

(क) शब्दः एव (ख) अलङ्कारः एव

(ग) अर्थः एव (घ) न किमपि

16. 'पद्यं चतुष्पदी' इति पद्यलक्षणं कुत्रोक्तम् ?

(क) पदमञ्जरीग्रन्थे (ख) न्यायमञ्जरीग्रन्थे

(ग) छन्दोमञ्जरीग्रन्थे (घ) विचारमञ्जरीग्रन्थे

17. मात्रिकछन्दसि प्रतिगणं कति मात्राः भवन्ति ?

(क) तिस्रः (ख) चतस्रः

(ग) पञ्च (घ) द्वे

18. अधस्तनेषु कः 'शब्दार्थालङ्कारः' ?

(क) पुनरुक्तवदाभासः (ख) उपमा

(ग) अनुप्रासः (घ) दीपकः

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR



UNNATI EDUCATIONS
9899436384: 9654-279-279

19. द्वयोः वस्तुनोः वैधर्म्यम् अनुक्त्वा इवादिशब्देन यत्र सादृश्यं कथ्यते, तत्र कः अलङ्कारः ?

(क) अनुप्रासः (ख) यमकम्

(ग) भ्रान्तिमान् (घ) उपमा

20. नाट्यशास्त्रस्य 'अभिनवभारती' इत्याख्यां व्याख्यां कः अरचयत् ?

(क) वरदराजः (ख) आनन्दवर्धनः

(ग) अभिनवगुप्तः (घ) मम्मटः

**[B]** पञ्चदशप्रश्नानां (**21-35**) यथानिर्देशम् उत्तराणि लिखत । यत्र प्रश्ने विकल्पः दत्तः अस्ति तत्र अन्यतरः समाधेयः

**2 × 15 = 30**

21. यथायोग्यं मेलयत – **2**

(i) खण्डकाव्यम् (क) अभिज्ञानशाकुन्तलम्

(ii) महाकाव्यम् (ख) ऋतुसंहारम्

(ग) कुमारसम्भवम्

22. यथायोग्यं मेलयत – **2**

(i) धनागमतृष्णाम् (क) भावय

(ii) गोविन्दम् (ख) जहीहि

(ग) भज

23. यथायोग्यं मेलयत – **2**

(i) पुण्डरीकपटलस्य (क) कर्मधारयसमासः

(ii) विप्रवटुः (ख) षष्ठीतत्पुरुषसमासः

(ग) बहुव्रीहिसमासः

24. प्रदत्तकथनं कस्येति यथायथं मेलयत – **2**

(i) भगवन् ! श्रूयतां यदि कुतूहलम् । (क) योगी

(ii) विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः (ख) ब्रह्मचारीगुरुः

(ग) श्यामवटुः

25. यथायोग्यं मेलयत – **2**

(i) प्रवक्तुम् (क) ल्यप्

(ii) प्रमृज्य (ख) यत्

(ग) तुमुन्



UNNATI EDUCATIONS
9899436384: 9654-279-279

26. अधोलिखितेषु सत्यासत्यं वा निर्णयत । **2**

(क) अपरिमाणोपशमो दारुणो लक्ष्मीमदः ।

(ख) शुकनासोपदेशः शिवराजविजयस्यांशः वर्तते ।

27. अधोलिखितेषु सत्यासत्यं वा निर्णयत । **2**

(क) लक्ष्मीः कौस्तुभमणेः मदं गृहीत्वा उद्गता ।

(ख) लक्ष्मीः लब्धापि दुःखेन परिपाल्यते ।

28. अधोलिखितेषु सत्यासत्यं वा निर्णयत । **2**

(क) राज्ञां यशः अभिषेककाले ध्वजपत्रसंलग्नैः पल्लवैः परिमार्ज्यते ।

(ख) राजानः कर्कटवत् सरलगत्या व्रजन्ति ।

29. अधोलिखितेषु सत्यासत्यं वा निर्णयत । **2**

(क) दुर्विनीतया लक्ष्म्या सज्जनः दुर्जनायते ।

(ख) विवेकी राजा हितवादिनाम् उपरि क्रोधं प्रकटयति ।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

30. अधोलिखितेषु सत्यासत्यं वा निर्णयत । **2**

(क) लक्षणा अभिधान्तर्गता एव इति मुकुलभट्टेन उक्तम् ।

(ख) शब्दः येन व्यापारेण लोकप्रसिद्धम् अर्थं बोधयति स व्यापारः लक्षणा इत्युच्यते ।

31. रिक्तस्थानं पूरयत । **2**

(क) यस्य वृत्तस्य पादचतुष्टये गुरुलघुक्रमेण समानसंख्यकम् अक्षरं विद्यते, तत् _________ वृत्तम् ।

(ख) यस्मिन् गणे सर्वाणि अक्षराणि गुरुसंज्ञकानि भवन्ति, स गणः ___________ भवति ।

32. रिक्तस्थानं पूरयत । **2**

(क) स्यादिन्द्रवज्रा यदि _________ ।

(ख) रान्नराविह __________ लगौ ।

33. रिक्तस्थानं पूरयत । **2**

(क) काव्यशोभाकरान् धर्मान् _________ प्रचक्षते ।

(ख) __________ शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।



**UNNATI EDUCATIONS**
**9899436384: 9654-279-279**

34. रिक्तस्थानं पूरयत । 2

(क) पूर्णोपमायाः __________ अङ्गानि सन्ति । (संख्या लेखनीया)

(ख) 'राजीवमिव राजीवं जलं जलमिवाजनि ।' इत्यत्र _______ अलङ्कारः ।

35. रिक्तस्थानं पूरयत । 2

(क) विभावानुभावव्यभिचारिसंयोगाद् ________ ।

(ख) व्यक्तः सः तैर्विभावाद्यैः स्थायीभावो __________ स्मृतः ।

[C] **षण्णां** प्रश्नानाम् यथानिर्देशं उत्तराणि लिखत – $2 \times 6 = 12$

36. शिशुपालवधमहाकाव्यस्य उपजीव्यकाव्यः कः ? शिशुपालवधकाव्ये नायकः कः ? 2

**अथवा**

कालिदासस्य कति नाटकानि वर्तन्ते ? नामानि लिखत ।

37. तारापीडस्य प्रधानमन्त्रिणः नाम किमासीत् ? सः कमुपदिष्टवान् ? 2

38. लक्षणावृत्तिः कुत्र प्रवर्तते ? 2

**अथवा**

लक्षणलक्षणायाः लक्षणं प्रतिपादयत । सा कतिविधा ?

39. द्रुतविलम्बितवृत्तस्य लक्षणं लिखत । 2

40. पुनरुक्तवदाभासालंकारस्य लक्षणम् उदाहरणं च प्रतिपादयत । 2

41. उत्प्रेक्षालङ्कारस्य उदाहरणं विलिख्य उदाहरणे लक्षणसमन्वयं प्रदर्शयत । 2

**अथवा**

समासोक्त्यलङ्कारस्य लक्षणं लिखत ।

[D] **षट्**-प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त । $3 \times 6 = 18$

42. भावार्थं लिखत – 3

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।
सम्प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ् करणे ।।

**अथवा**

अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः ।।



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
UNNATI EDUCATIONS
9899436384: 9654-279-279

43. भगवान् भास्करः किं किं करोति ? कार्यत्रयं लिखत । **3**

**अथवा**

विप्रवटुः किं चिन्तयन् पुष्पावचयं कर्तुम् आरेभे ?

44. कालः कीदृशः ? **3**

45. चन्द्रापीडः किमर्थम् उपदेष्टव्यः नास्ति ? उपदेशारम्भस्य कारणं च लिखत । **3**

46. लक्ष्मीः कं नालिङ्गति, कं च न स्पृशति ? **3**

47. रससूत्रविषये उत्पत्तिवादं स्पष्टयत । **3**

**[E]** **चत्वारः** प्रश्नाः दीर्घोत्तरैः समाधेयाः । **5 × 4 = 20**

48. कालः किं किं करोति ? **5**

**अथवा**

शिववीरस्य विशेषताः यथापाठं समुपस्थापयत ।

49. लक्ष्मीः क्षीरसागरात् कानि विरहविनोदचिह्नानि गृहीत्वा उद्गता ? **5**

**अथवा**

श्रियः स्वभावं वर्णयत ।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

50. 'परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम् ।' अस्य कथनस्य समर्थने त्रीणि उदाहरणानि प्रदर्शयत । **5**

51. दृष्टान्तालङ्कारस्य लक्षणोदाहरणं लिखत । उदाहरणे लक्षणसमन्वयमपि प्रदर्शयत । **5**

**अथवा**

रससिद्धान्ते साधारणीकरणं निरूपयत ।

---



UNNATI EDUCATIONS
9899436384: 9654-279-279